

# Sri Vishnu Sahasranama Stotram - Skanda Puranam

# ॥ श्री विष्णु सहस्रनाम स्तोत्रम् - श्री स्कन्द पुराणम् ॥

This following is a very rare **Vishnu Sahasranama Stotram** from **Skanda Puranam**, **Avanti Khanda**, **Chapter 74** (**Vamana Kunda Mahima**). The Sahasranama Stotram is told by **Lord Brahma** to **Devas** and **Sage Narada** in the context of **Vamana Kunda Mahatmya**.

Though it is a rare one, its very elaborate **Phalashruti** speaks volumes about the greatness of the Stotra and the benefits one accrues by chanting it. A brief description (excerpts only) of benefits one accrues by chanting this Sahasranama:

- One who chants this thrice a day gets absolved of all sins, enjoys the company of spouse and progeny, begets all wealth, gets relief from all troubles, etc.
- Those who seek knowledge, victory, wealth , comforts, relief from diseases, progeny, Moksha, good spouse, etc. get their wishes fulfilled.
- One who chants this Sahasranama 100 times in or near a forest filled with Tulasi plants, a temple, **Badrikashrama**, **Ganges** river, a hermitage, **Prayag**, **Dwaraka**, **Mahakala Vana** (**Ujjain Mahakaleshwar Jyotirlinga**), etc. attains **Siddhi** and resides in **Siddhaloka** as well as other innumerable benefits.

देवा ऊचुः -

ब्रह्मन् केन प्रकारेण विष्णु भक्तिः पराभवेत् ।
तत् सर्वं श्रोतुं इच्छामस् त्वत्तो ब्रह्म विदांवर ॥ १ ॥

ब्रह्मोवाच -

श्रूयतां भोः सुरश्रेष्ठाः विष्णु भक्तिं अनुत्तमाम् ॥ २ ॥

शुक्लाम्बर धरं देवं शशि वर्णं चतुर्भुजम् ।
प्रसन्न वदनं ध्यायेत् सर्व विघ्नो ऽ पशान्तये ॥ ३ ॥

लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः ।
येषां इन्दीवर श्यामो हृदयस्थो जनार्द्दनः ॥ ४ ॥

अभीप्सितार्थ सिद्ध्यर्थं पूज्यते यः सुरैरपि ।
सर्व विघ्न हरस् तस्मै गणाधिपतये नमः ॥ ५ ॥

कल्पादौ सृष्टि कामेन प्रेरिता ऽ हं च शौरिणा ।
न शक्तो वै प्रजाः कर्तुं विष्णु ध्यान परायणः ॥ ६ ॥

एतस्मिन् अन्तरे सद्यो मार्कण्डेयो महाऋषिः ।
सर्व सिद्धेश्वरो दान्तो दीर्घायुर् विजितेन्द्रियः ॥ ७ ॥

मया दृष्टो ऽ थगत्वातं तदाहं समुपस्थितः ।
ततः प्रफुल्ल नयनौ सत्कृत्य चेतरेतरम् ॥ ८ ॥

पृच्छामानौ परं स्वास्थ्यं सुखासीनौ सुरोत्तमाः ।
तदा मया स पृष्टो वै मार्काण्डेयो महामुनिः ॥ ९ ॥

भगवन् केन प्रकारेण प्रजा मे ऽ नामया भवेत् ।
तत् सर्वं श्रोतुं इच्छामि भगवन् मुनि वन्दित ॥ १० ॥

श्री मार्कण्डेय उवाच -

विष्णु भक्तिः परा नित्या सर्वार्ति दुःख नाशिनी ।
सर्व पाप हरा पुण्या सर्व सुख प्रदायिनी ॥ ११ ॥

एषा ब्राह्मी महाविद्या न देया यस्य कस्यचित् ।
कृतघ्नाय ह्यशिष्याय नास्तिकाया ऽ नृताय च ॥ १२ ॥

ईर्ष्यकाय च रूक्षाय कामिकाय कदाचन ।
तद् गतं सर्वं विघ्नन्ति यत्तद् धर्म सनातनम् ॥ १३ ॥

एतद् गुह्यतमं शास्त्रं सर्व पाप प्रणाशनम् ।
पवित्रं च पवित्राणां पावनानां च पावनम् ॥ १४ ॥

विष्णोर् नाम सहस्रं च विष्णु भक्ति करं शुभम् ।
सर्व सिद्धि करं नृणां भुक्ति मुक्ति प्रदं शुभम् ॥ १५ ॥

## ॥ विनियोगः ॥

ॐ अस्य श्रीविष्णु सहस्रनाम स्तोत्र मन्त्रस्य । मार्कण्डेय ऋषिः । विष्णुर् देवता । अनुष्टुप् छन्दः । सर्व काम अवाप्यर्थे जपे विनियोगः ॥

## ॥ ध्यानम् ॥

सजंजल जलद नीलं दर्शितो दार शीलम्
कर तल धृत शैलं वेणु वाद्ये रसालम् ।
व्रज जन कुल पालं कामिनी केलि लोलम्
तरुण तुलसि मालं नौमि गोपाल बालम् ॥

## ॥ श्रीविष्णु सहस्रनाम स्तोत्रम् ॥

ॐ विश्वं विष्णुर् हृषीकेशः सर्वात्मा सर्वभावनः ।
सर्वगः शर्वरी नाथो भूतग्रामा ऽऽ शयाशयः ॥ १ ॥

अनादि निधनो देवः सर्वज्ञः सर्व संभवः ।
सर्व व्यापा जगद्धाता सर्व शक्ति धरो ऽ नघः ॥ २ ॥

जगद्बीजं जगत्स्रष्टा जगदीशो जगत्पतिः ।
जगत्गुरुर् जगन्नाथो जगद्धाता जगन्मयः ॥ ३ ॥

सर्वा ऽऽ कृति धरः सर्व विश्वरूपी जनार्द्दनः ।
अजन्मा शाश्वतो नित्यो विश्वाधारो विभुः प्रभुः ॥ ४ ॥

बहु रूपैक रूपश्च सर्व रूप धरो हरः ।
कालाग्नि प्रभवो वायुः प्रलयान्तकरो ऽ क्षयः ॥ ५ ॥

महार्णवो महामेघो जलबुद् बुध संभवः ।
संस्कृतो विकृतो मत्स्यो महामत्स्यस् तिमिङ्गिलः ॥ ६ ॥

अनन्तो वासुकिः सेषो वराहो धरणीधरः ।
पयः क्षीर विवेकाढ्यो हंसो हैमगिरि स्थितः ॥ ७ ॥

हयग्रीवो विशालाक्षो हयकर्णो दयाकृतिः ।
मन्थनो रत्नहारी च कूर्मो धर धराधरः ॥ ८ ॥

विनिद्रो निद्रितो नन्दी सुनन्दो नन्दन प्रियः ।
नाभि नाल मृणाली च स्वयंभूश् चतुराननः ॥ ९ ॥

प्रजापति परो दक्षः सृष्टि कर्ता प्रजाकरः ।
मरीचिः कश्यपो दक्षः सुरा ऽ सुर गुरुः कचिः ॥ १० ॥

वामनो वाममार्गी च वामकर्मा बृहद् वपुः ।
त्रैलोक्य क्रमणो दीपो बलि यज्ञ विनाशनः ॥ ११ ॥

यज्ञहर्ता यज्ञकर्ता यज्ञेशो यज्ञभुग् विभुः ।
सहस्रांशुर् भगो भानुर् विवस्वानरविर् अंशुमान् ॥ १२ ॥

तिग्मतेजाश् चा ऽ ल्पतेजाः कर्मसाक्षी मनुर् यमः ।
देवराजः सुरपतिर् दानवारिः शचीपतिः ॥ १३ ॥

अग्निर् वायु सखो वह्निर् वरुणां यादसां पतिः ।
नैरृतो नादनो ऽ नादी रक्ष यज्ञो धनाधिपः ॥ १४ ॥

कुबेरो वित्तवान् वेगो वसुपालो विलासकृत् ।
अमृत स्रवणः सोमः सोमपान करः सुधीः ॥ १५ ॥

सर्वौषधि करः श्रीमान् निशाकर दिवाकरः ।
विषारिर् विषहर्ता च विषकण्ठ धरो गिरिः ॥ १६ ॥

नीलकण्ठो वृषी रुद्रो भालचन्द्रो ह्युमापतिः ।
शिवः शान्तो वशी वीरो ध्यानी मानी च मानदः ॥ १७ ॥

कृमिकीटो मृग व्याधो मृगहा मृगलाञ्छनः ।
बटुको भैरवो बालः कपाली दण्ड विग्रहः ॥ १८ ॥

श्मशान वासी मांसाशा दुष्ट नाशी वरान्तकृत् ।
योगिनी त्रासको योगी ध्यानस्थो ध्यान वासनः ॥ १९ ॥

सेनानीः सेनदः स्कन्दो महाकालो गणाधिपः ।
आदिदेवो गणपतिर् विघ्नहा विघ्न नाशनः ॥ २० ॥

ऋद्धि सिद्धि प्रदो दन्ती भालचन्द्रो गजाननः ।
नृसिंह उग्र दंष्ट्रश्च नखी दानव नाशकृत् ॥ २१ ॥

प्रह्लाद पोषकर्ता च सर्व दैत्य जनेश्वरः ।
शलभः सागरः साक्षी कल्पद्रुम विकल्पकः ॥ २२ ॥

हेमदो हेमभागी च हिमकर्ता हिमाचलः ।
भूधरो भूमिदो मेरुः कैलास शिखरो गिरिः ॥ २३ ॥

लोका लोकान्तरो लोकी विलोकी भुवनेश्वरः ।
दिक्पालो दिक्पतिर् दिव्यो दिव्यकायो जितेन्द्रियः ॥ २४ ॥

विरूपो रूपवान् रागी नृत्य गीत विशारदः ।
हाहा हूहूश् चित्ररथो देवर्षिर् नारदः सखा ॥ २५ ॥

विश्वे देवाः साध्यदेवा धृताशीश्च चलो ऽ चलः ।
कपिलो जल्पको वादी दत्तो हैहय सङ्घराट् ॥ २६ ॥

वसिष्ठो वामदेवश्च सप्तर्षिर् प्रवरो भृगुः ।
जामदग्न्यो महावीरः क्षत्रियान्त करो ऋषिः ॥ २७ ॥

हिरण्यकशिपुश् चैव हिरण्याक्षो हरप्रियः ।
अगस्तिः पुलहो दक्षः पौलस्त्यो रावणो घटः ॥ २८ ॥

देवारिस् तापसस् तापी विभीषण हरिप्रियः ।
तेजस्वी तेजदस् तेजी ईशो राजपतिः प्रभुः ॥ २९ ॥

दासरथी राघवो रामो रघुवंश विवर्धनः ।
सीतापतिः पतिः शीमान् ब्रह्मण्यो भक्त वत्सलः ॥ ३० ॥

सन्नदः कवची खड्गी चीरवासा दिगम्बरः ।
किरीटी कुण्डली चापी शङ्ख चक्री गदाधरः ॥ ३१ ॥

कौशल्या नन्दनो दारो भूमिशायी गुहप्रियः ।
सौमित्रो भरतो बालः शत्रुघ्नो भरताग्रजः ॥ ३२ ॥

लक्ष्मणः परवीरघ्नः स्त्रीसहायः कपीश्वरः ।
हनुमान् वृक्षराजश्च सुग्रीवो बलिनाशनः ॥ ३३ ॥

दूतप्रियो दूतकारी ह्यङ्गदो गदतां वरः ।
वनध्वंसी वनी वेगो वानर ध्वज लाङ्गुली ॥ ३४ ॥

रवि दंष्ट्री च लङ्काहा हाहाकारो वरप्रदः ।
भवसेतुर् महासेतुर् बद्धसेतू रमेश्वरः ॥ ३५ ॥

जानकी वल्लभः कामी किरीटी कुण्डली खगी ।
पुण्डरीक विशालाक्षो महाबाहुर् धनाकृतिः ॥ ३६ ॥

चङ्चलश् चपलः कामी वामी वामाङ्ग वत्सलः ।
स्त्रीप्रियः स्त्रीपरः स्त्रैणः स्त्रियो वामाङ्ग वासकः ॥ ३७ ॥

जितवैरी जितकामो जितक्रोधो जितेन्द्रियः ।
शान्तो दान्तो दयारामो ह्येकस्त्री व्रत धारकः ॥ ३८ ॥

सात्त्विकः सत्त्व संस्थानो मदहा क्रोधहा खरः ।
बहु राक्षस संवीतः सर्व राक्षस नाशकृत् ॥ ३९ ॥

रावणारी रणक्षुद्र दशमस्तकच् छेदकः ।
राज्यकारी यज्ञकारी दाता भोक्ता तपोधनः ॥ ४० ॥

अयोध्याधिपतिः कान्तो वैकुण्ठो ऽ कुण्ठ विग्रहः ।
सत्यव्रतो व्रती शूरस् तपी सत्य फलप्रदः ॥ ४१ ॥

सर्वसाक्षी सर्वगश्च सर्व प्राणहरो ऽ व्ययः ।
प्राणश् च अथाप्यपानश्च व्यानोदानः समानकः ॥ ४२ ॥

नागः कृकलः कूर्मश्च देवदत्तो धनञ्जयः ।
सर्वप्राण विदो व्यापी योगधारक धारकः ॥ ४३ ॥

तत्त्ववित् तत्त्वदस् तत्त्वी सर्व तत्त्व विशारदः ।
ध्यानस्थो ध्यानशाली च मनस्वी योग वित्तमः ॥ ४४ ॥

ब्रह्मज्ञो ब्रह्मदो ब्रह्म ज्ञाता च ब्रह्म संभवः ।
अध्यात्म विद्विदो दीपो ज्योतिरूपो निरञ्जनः ॥ ४५ ॥

ज्ञानदो ऽ ज्ञानहा ज्ञानी गुरुः शिष्योपदेशकः ।
सुशिष्यः शिक्षितः शाली शिष्य शिक्षा विशारदः ॥ ४६ ॥

मन्त्रदो मन्त्रहा मन्त्री तन्त्री तन्त्र जनप्रियः ।
सन्मन्त्रो मन्त्रविन् मन्त्री यन्त्र मन्त्रैक भञ्जनः ॥ ४७ ॥

मारणो मोहनो मोही स्तंभोच्चाटन कृत् खलः ।
बहुमायो विमायश्च महामाया विमोहकः ॥ ४८ ॥

मोक्षदो बन्धको बन्दी ह्याकर्षण विकर्षणः ।
ह्रींकारो बीजरूपी च क्लींकारः कीलकाधिपः ॥ ४९ ॥

सौंकारः शक्तियाञ् च्छक्तिः सर्व शक्ति धरो धरः ।
अकारोकार ओंकारश् छन्दो गायत्र संभवः ॥ ५० ॥

वेदो वेदविदो वेदी वेदाध्यायी सदाशिवः ।
ऋग् यजुः सामार्थ वेशः सामगान करो ऽ करी ॥ ५१ ॥

त्रिपदो बहुपादी च शतपथः सर्वतोमुखः ।
प्राकृतः संस्कृतो योगी गीत ग्रन्थ प्रहेलिकः ॥ ५२ ॥

सगुणो विगुणश् छन्दो निःसङ्गो विगुणो गुणी ।
निर्गुणो गुणवान् सङ्गी कर्मी धर्मी च कर्मदः ॥ ५३ ॥

निष्कर्मा कामकामी च निःसङ्गः सङ्ग वर्जितः ।
निर्लोभो निरहङ्कारी निष्किञ्चन जनप्रियः ॥ ५४ ॥

सर्व सङ्गकरो रागी सर्व त्यागी बहिश्चरः ।
एकपादो द्विपादश्च बहुपादो ऽ ल्प पादकः ॥ ५५ ॥

द्विपदस् त्रिपदो ऽ पादी विपादी पदसङ्ग्रहः ।
खेचरो भूचरो भ्रामी भृङ्ग कीट मधुप्रियः ॥ ५६ ॥

क्रतुः संवत्सरो मासो गणितार्को ह्यहर्निशः ।
कृतं त्रेता कलिश् चैव द्वापरश् चतुराकृतिः ॥ ५७ ॥

दिवा कालकरः कालः कुलधर्मः सनातनः ।
कलाकाष्ठा कलानाड्यो यामः पक्षः सिता ऽ सितः ॥ ५८ ॥

युगो युगन्धरो योग्यो युग धर्म प्रवर्त्तकः ।
कुलाचारः कुलकरः कुलदैव करः कुली ॥ ५९ ॥

चतुराश्रम चारी च गृहस्थो ह्यतिथि प्रियः ।
वनस्थो वनचारी च वानप्रस्थाश्रमो ऽ श्रमी ॥ ६० ॥

बटुको ब्रह्मचारी च शिखा सूत्री कमण्डली ।
त्रिजटी ध्यानवान् ध्यानी बद्रिकाश्रम वासकृत् ॥ ६१ ॥

हेमाद्रि प्रभवो हैमां हेमराशिर् हिमाकरः ।
महा प्रस्थानको विप्रो विरागी रागवान् गृही ॥ ६२ ॥

नर नारायणो ऽ नागो केदारो दार विग्रहः ।
गङ्गा द्वार तपः सारस् तपोवन तपोनिधिः ॥ ६३ ॥

निधिरेव महापद्मः पद्माकर श्रियालयः ।
पद्मनाभः परीतात्मा परिव्राट् पुरुषोत्तमः ॥ ६४ ॥

परानन्दः पुराणश्च सम्राड् राज विराजकः ।
चक्रस्थश् चक्रपालस्थश् चक्रवर्ती नराधिपः ॥ ६५ ॥

आयुर्वेद विदो वैद्यो धन्वन्तरिश्च रोगहा ।
औषधी बीज संभूतो रोगी रोग विनाश कृत् ॥ ६६ ॥

चेतनश् चेतको ऽ चिन्त्यश् चित्त चिन्ता विनाशकृत् ।
अतीन्द्रियः सुख स्पर्शश् चरचारी विहङ्गमः ॥ ६७ ॥

गरुडः पक्षिराजश्च चाक्षुषो विनतात्मजः ।
विष्णु यान विमानस्थो मनोमय तुरङ्गमः ॥ ६८ ॥

बहु वृष्टि करो वर्षी ऐरावण विरावणः ।
उच्चैःश्रवा ऽ रुणो गामी हरिदश्वो हरिप्रियः ॥ ६९ ॥

प्रावृषो मेघमाली च गजरत्न पुरन्दरः ।
वसुदो वसुधारश्च निद्रालुः पन्नगाशनः ॥ ७० ॥

शेषशायी जलेशायी व्यासः सत्यवती सुतः ।
वेदव्यास करो वाग्ग्मी बहुशाखा विकल्पकः ॥ ७१ ॥

स्मृतिः पुराण धर्मार्थी परावर विचक्षणः ।
सहस्र शीर्षा सहस्राक्षः सहस्र वदनोज्ज्वलः ॥ ७२ ॥

सहस्र बाहुः सहस्रांशुः सहस्र किरणो नरः ।
बहु शीर्षैक शीर्षश्च त्रिशिरा विशिराः शिरी ॥ ७३ ॥

जटिलो भस्मरागी च दिव्यांबर धरः शुचिः ।
अणुरूपो बृहद्रूपो विरूपो विकराकृतिः ॥ ७४ ॥

समुद्र माथको माथी सर्व रत्न हरो हरिः ।
वज्र वैडूर्यको वज्री चिन्तामणि महामणिः ॥ ७५ ॥

अनिर्मूल्यो महामूल्यो निर्मूल्यः सुरभिः सुखी ।
पिता माता शिशुर् बन्धुर् धाता त्वष्टर्यमा यमः ॥ ७६ ॥

अन्तःस्थो वाह्यकारी च बहिस्थो वै बहिश्चरः ।
पावनः पावका पाकी सर्व भक्षी हुताशनः ॥ ७७ ॥

भगवान् भगहा भागी भव भञ्जो भयङ्करः ।
कायस्थः कायकारी च कायकर्ता करप्रदः ॥ ७८ ॥

एकधर्मा द्विधर्मा च सुखी दूत्योपजीविकः ।
बालकस् तारकस् त्राता कालो मूषक भक्षकः ॥ ७९ ॥

सञ्जीवनो जीवकर्ता सजीवो जीवसंभवः ।
षड्विशको महाविष्णुः सर्वव्यापी महेश्वरः ॥ ८० ॥

दिव्याङ्गदो मुक्तमाली श्रीवत्सो मकर ध्वजः ।
श्याममूर्तिर् घनश्यामः पीतवासा शुभाननः ॥ ८१ ॥

चीरवासा विवासाश्च भूत दानव वल्लभः ।
अमृतो ऽ मृत भागनी च मोहिनी रूप धारकः ॥ ८२ ॥

दिव्य दृष्टिः समदृष्टिर् देव दानव वञ्चकः ।
कबन्धः केतुकारी च स्वर्भानुश् चन्द्र तापनः ॥ ८३ ॥

ग्रहराजो ग्रही ग्राहः सर्वग्रह विमोचकः ।
दान मान जपो होमः सानुकूलः शुभग्रहः ॥ ८४ ॥

विघ्नकर्ता ऽ पहर्ता च विघ्ननाशो विनायकः ।
अपकारोपकारी च सर्व सिद्धि फलप्रदः ॥ ८५ ॥

सेवकः सामादानी च भेदी दण्डी च मत्सरी ।
दयावान् दानशीलश्च दानी यज्वा प्रतिग्रही ॥ ८६ ॥

हविर् अग्निश् चरुस्थाली समिधश् चा ऽ निलो यमः ।
होतोद्गाता शुचिः कुण्डः सामगो वैकृतिः सवः ॥ ८७ ॥

द्रव्यं पात्राणि सङ्कल्पो मुशलो ह्यरणिः कुशः ।
दीक्षितो मण्डपो वेदिर् यजमानः पशुः क्रतुः ॥ ८८ ॥

दक्षिणा स्वस्तिमान् स्वस्ति ह्याशीर्वादः शुभप्रदः ।
आदिवृक्षो महावृक्षो देववृक्षो वनस्पतिः ॥ ८९ ॥

प्रयागो वेणुमान् वेणी न्यग्रोधश् चा ऽ क्षयो वटः ।
सुतीर्थस् तीर्थकारी च तीर्थराजो व्रती व्रतः ॥ ९० ॥

वृत्तिदाता पृथुः पुत्रो दोग्धा गौर्वत्स एव च ।
क्षीरं क्षीर वहः क्षीरी क्षीर भाग विभागवित् ॥ ९१ ॥

राज्य भाग विदो भागी सर्व भाग विकल्पकः ।
वाहनो वाहको वेगी पदचारो तपश्चरः ॥ ९२ ॥

गोपनो गोपको गोपी गोप कन्या विहार कृत् ।
वासुदेवो विशालाक्षः कृष्णो गोपीजन प्रियः ॥ ९३ ॥

देवकी नन्दनो नन्दी नन्दगोप गृहा ऽऽ श्रमी ।
यशोदा नन्दनो दामी दामोदर उलूखला ॥ ९४ ॥

पूतनारिः पदाकारी लीला शकट भञ्जकः ।
नवनीत प्रियो वाग्ग्मी वत्सबाल कपालकः ॥ ९५ ॥

वत्सरूप धरो वत्सी वत्सहा धेनुकान्त कृत् ।
बकारिर् वनवासी च वनक्रीडा विशारदः ॥ ९६ ॥

कृष्ण वर्णाकृतिः कान्तो वेणु वेत्र विधारकः ।
गोप मोक्ष करो मोक्षो यमुना पुलिनेचरः ॥ ९७ ॥

माया वत्स करो मायी ब्रह्म मायापमोहकः ।
आत्मसार विहारज्ञो गोप दारक दारकः ॥ ९८ ॥

गोचारी गोपतिर् गोपो गोवर्धन धरो बली ।
इन्द्रधुग्नो मख ध्वंसी वृष्टिहा गोप रक्षकः ॥ ९९ ॥

सुरभि त्राण कर्ता च दावपान करः कली ।
कालीय मर्द्दनः काली यमुनाह्रद विहारकः ॥ १०० ॥

सङ्कर्षणो बलश्लाध्यो बलदेवो हलायुधः ।
लाङ्गली मुसली चक्री रामो रोहिणि नन्दनः ॥ १०१ ॥

यमुना ऽ कर्षणोद्धारो नीलवासा हलो हली ।
रेवती रमणो लोलो बहुमान करः परः ॥ १०२ ॥

धेनुकारिर् महावारो गोपकन्या विदूषकः ।
काममानहरः कामी गोपीवासो ऽ पतस्करः ॥ १०३ ॥

वेणुवादी च नादी च नृत्य गीत विशारदः ।
गोपी मोह करो गानी रासको रजनी चरः ॥ १०४ ॥

दिव्यमाली विमाली च वनमाला विभूषितः ।
कैटभारिश्च कंसारिर् मधुहा मधुसूदनः ॥ १०५ ॥

चाणूर मर्द्दनो मल्लो मुष्टी मुष्टिक नाश कृत् ।
मुरहा मोदको मोदी मदघ्नो नरकान्त कृत् ॥ १०६ ॥

विद्याध्यायी भूमिशायी सुदामा सुसखा सुखी ।
सकलो विकलो वैद्यः कलितो वै कलानिधिः ॥ १०७ ॥

विद्याशाली विशाली च पितृ मातृ विमोक्षकः ।
रुक्मिणी रमणो रम्यः कालिन्दी पतिः शङ्कहा ॥ १०८ ॥

पाञ्चजन्यो महापद्मो बहुनायक नायकः ।
धुन्धुमारो निकुंभघ्नः शंबरान्तो रतिप्रियः ॥ १०९ ॥

प्रद्युम्नश् चा ऽ निरुद्धश्च सात्वतां पतिर् अर्जुनः ।
फाल्गुनश्च गुडाकेशः सव्यसाची धनञ्जयः ॥ ११० ॥

किरीटा च धनुष्पाणिर् धनुर्वेद विशारदः ।
शिखण्डी सात्यकिः शैव्यो भीमो भीम पराक्रमः ॥ १११ ॥

पाञ्चालश् चा ऽ भिमन्युश्च सौभद्रो द्रौपदीपतिः ।
युधिष्ठिरो धर्मराजः सत्यवादी शुचिव्रतः ॥ ११२ ॥

नकुलः सहदेवश्च कर्णो दुर्योधनो वृणी ।
गाङ्गेयो ऽ थ गदापाणिर् भीष्मो भागीरथी सुतः ॥ ११३ ॥

प्रज्ञा चक्षुर् धृतराष्ट्रो भारद्वाजो ऽ थ गौतमः ।
अश्वत्थामा विकर्णश्च जह्नुर् युद्ध विशारदः ॥ ११४ ॥

सीमन्तिको गदी गाल्वो विश्वामित्रो दुरासदः ।
दुर्वासा दुर्विनीतश्च मार्कण्डेयो महामुनिः ॥ ११५ ॥

लोमशो निर्मलो ऽ लोमी दीर्घायुश्च चिरो ऽ चिरी ।
पुनर्जीवी मृतो भावी भूतो भव्यो भविष्यकः ॥ ११६ ॥

त्रिकालो ऽ थ त्रिलिङ्गश्च त्रिनेत्रस् त्रिपदी पतिः ।
यादवो याज्ञवल्क्यश्च यदुवंश विवर्धनः ॥ ११७ ॥

शल्य क्रीडी विक्रीडश्च यादवान्तकरः कली ।
सदयो हृदयो दायो दायदो दायभाग् दयी ॥ ११८ ॥

महोदधिर् महीपृष्ठो नील पर्वत वास कृत् ।
एकवर्णो विवर्णश्च सर्व वर्ण बहिश्चरः ॥ ११९ ॥

यज्ञ निन्दी वेद निन्दी वेदवाह्यो बलो बलिः ।
बौद्धारिर् बाधको बाधो जगन्नाथो जगत्पतिः ॥ १२० ॥

भक्तिर् भागवतो भागी विभक्तो भगवत् प्रियः ।
त्रिग्रामो ऽ थ नवारण्यो गुह्योपनिषदासनः ॥ १२१ ॥

शालिग्रामः शिलायुक्तो विशालो गण्डकाश्रयः ।
श्रुत देवः श्रुतः श्रावी श्रुत बोधः श्रुत श्रवाः ॥ १२२ ॥

कल्किः कालकलः कल्को दुष्ट म्लेच्छ विनाश कृत् ।
कुङ्कुमी धवलो धारः क्षमाकरो वृषाकपिः ॥ १२३ ॥

किङ्करः किन्नरः कण्वः केकी किम्पुरुषाधिपः ।
एकरोमा विरोमा च बहुरोमा बृहत् कविः ॥ १२४ ॥

वज्र प्रहरणो वज्री वृत्रघ्नो वासवानुजः ।
बहु तीर्थ करस् तीर्थः सर्व तीर्थ जनेश्वरः ॥ १२५ ॥

व्यतीपातो परागश्च दान वृद्धि करः शुभः ।
असंख्येयो ऽ प्रमेयश्च संख्याकारो विसंख्यकः ॥ १२६ ॥

मिहिकोत्तारकस् तारो बालचन्द्रः सुधाकरः ।
किम्वर्णः कीदृशः किञ्चित् किस्वभावः किमाश्रयः ॥ १२७ ॥

निर्लोकश्च निराकारी बह्वाकारैक कारकः ।
दौहित्रः पुत्रिकः पौत्रो नप्ता वंश धरो धरः ॥ १२८ ॥

द्रवीभूतो दयालुश्च सर्व सिद्धि प्रदो मणिः ।
आधारो ऽ पि विधारश्च धरासूनुः सुमङ्गलः ॥ १२९ ॥

मङ्गलो मङ्गलाकारो माङ्गल्यः सर्व मङ्गल्यः ॥ १३० ॥

## ॥ फलश्रुतिः ॥

नाम्नां सहस्रं नामेदं विष्णोर् अतुल तेजसः ।
सर्व सिद्धि करं काम्यं पुण्यं हरिहरात्मकम् ॥ १ ॥

यः पठेत् प्रातरुत्थाय शुचिर् भूत्वा समाहितः ।
यश्चेदं श्रृणुयान् नित्यं नरो निश्चल मानसः ॥ २ ॥

त्रिसन्ध्यं श्रद्धया युक्तं सर्व पापैः प्रमुच्यते ।
नन्दते पुत्र पौत्रैश्च दारैर् भृत्यैश्च पूजितः ॥ ३ ॥

प्राप्नुते विपुलां लक्ष्मीं मुच्यते सर्व सङ्कटात् ।
सर्वान् कामान् अवाप्नोति लभते विपुलां यशः ॥ ४ ॥

विद्यावाञ् जायते विप्रः क्षत्रियो विजयी भवेत् ।
वैश्यश्च धन लाभाढ्यः शूद्रः सुखं अवाप्नुयात् ॥ ५ ॥

रणे घोरे विवादे च व्यापारे पारतन्त्रके ।
विजयी जयमाप्नोति सर्वदा सर्व कर्मसु ॥ ६ ॥

एकधा दशधा चैव शतधा च सहस्रधा ।
पठते हि नरो नित्यं तथैव फलमश्नुते ॥ ७ ॥

पुत्रार्थी प्राप्नुते पुत्रान् धनार्थी धनमव्ययम् ।
मोक्षार्थी प्राप्नुते मोक्षं धर्मार्थी धर्म सञ्चयम् ॥ ८ ॥

कन्यार्थी प्राप्नुते कन्यां दुर्लभां यत् सुरैरपि ।
ज्ञानार्थी जायते ज्ञानी योगी योगेषु युज्यते ॥ ९ ॥

महोत्पातेषु घोरेषु दुर्भिक्षे राज विग्रहे ।
महामारी समुद्भूते दारिद्र्यो दुःख पीडिते ॥ १० ॥

अरण्ये प्रान्तरे वा ऽ पि दावाग्नि परिवारिते ।
सिंह व्याघ्राभि भूते ऽ पि वने हस्ति समाकुले ॥ ११ ॥

राज्ञा क्रुद्धेन चाज्ञप्ते दस्युभिः सह सङ्गमे ।
विद्युत् पातेषु घोरेषु स्मर्तव्यं हि सदा नरैः ॥ १२ ॥

ग्रह पीडासु चोग्रासु वध बन्ध गतावपि ।
महार्णवे महानद्यां पोतस्थेषु न चापदः ॥ १३ ॥

रोग ग्रस्तो विवर्णश्च गत केश नखत्वचः ।
पठनाच् छ्रवणाद् वापि दिव्य काया भवन्ति ते ॥ १४ ॥

तुलसी वन संस्थाने सरोद्वीपे सुरालये ।
बद्रिकाश्रमे शुभे देशे गङ्गा द्वारे तपोवने ॥ १५ ॥

मधुवने प्रयागे च द्वारकायां समाहितः ।
महाकाल वने सिद्धे नियताः सर्व कार्मिकाः ॥ १६ ॥

ये पठन्ति शतावर्तं भक्तिमान् तो जितेन्द्रियः ।
ते सिद्धाः सिद्धिदा लोके विचरन्ति महीतले ॥ १७ ॥

अन्योन्ये भेद भेदानां मैत्री करणं उत्तमम् ।
मोहनं मोहनानां च पवित्रं पाप नाशनम् ॥ १८ ॥

बालग्रह विनाशाय शान्ती करणं उत्तमम् ।
दुर्वृत्तानां च पापानां बुद्धि नाशकरं परम् ॥ १९ ॥

पतद् गर्भा च वन्ध्या च स्राविणी काक वन्ध्यका ।
अनायसेन सततं पुत्रमेव प्रसूयते ॥ २० ॥

पयः पुष्कलदा गावो बहु धान्य फला कृषिः ।
स्वामि धर्म पराभृत्या नारी पतिव्रता भवेत् ॥ २१ ॥

अकाल मृत्यु नाशाय तथा दुःस्वप्न दर्शने ।
शान्ति कर्मणि सर्वत्र स्मर्तव्यं च सदा नरैः ॥ २२ ॥

यः पठन्त्यन्वहं मर्त्यः शुचिष्मान् विष्णु सन्निधौ ।
एकाकी च जिताहारो जितक्रोधो जितेन्द्रियः ॥ २३ ॥

गरुडारोह संपन्नः पीतवासाश् चतुर्भुजः ।
वाञ्छितं प्राप्य लोके ऽ स्मिन् विष्णु लोके स गच्छति ॥ २४ ॥

एकतः सकला विद्या एकतः सकलं तपः ।
एकतः सकलो धर्मो नाम विष्णोस् तथैकतः ॥ २५ ॥

यो हि नाम सहस्रेण स्तोतुं इच्छति वै द्विजः ।
सो ऽ यं एकेन श्लोकेन स्तुत एव न संशयः ॥ २६ ॥

सहस्राक्षः सहस्रपात् सहस्र वदनोज्ज्वलः ।
सहस्रनामा ऽ नन्ताक्षः सहस्रबाहुर् नमो ऽ स्तु ते ॥ २७ ॥

विष्णोर् नाम सहस्रं वै पुराणं वेद सम्मतम् ।
पठितव्यं सदा भक्तैः सर्व मङ्गल मङ्गलम् ॥ २८ ॥

---

**॥ इति श्री स्कान्द पुराणे अवन्ती खण्डे श्री विष्णु सहस्रनाम स्तोत्रं संपुर्णम् ॥**